# चतुर्थप्रकरणम्
# वैदिकविचारधायां लोककल्याणस्य सङ्कल्पना

४.१ पारिवारिकं सौहार्दम् - पारिवारिकम् ऐक्यम्

४.२ विश्वबन्धुत्वस्य भावना

४.३ वेदेषु राष्ट्रीयभावनाद्वारा लोककल्याणम्

४.४ वैदिकी-शिक्षाप्रणालीद्वारा लोककल्याणस्य निर्देशः

४.४.१ निरूक्ते शिक्षणविचाराः

# चतुर्थप्रकरणम्
# वैदिकविचारधायां लोककल्याणस्य सङ्कल्पना ।

## ४.१ पारिवारिकं सौहार्द्दम्

सहृदयं सांमनस्यमविद्वेषणां कृणांमि वः ।
अन्यो अन्यमभि हर्यत वत्सं जातमिवाध्न्या ॥

शरीरविद्यायाः अनुसारं शरीरादस्मदीयात् अधिकांशः मातुः शरीरादेव प्रजायते । सैव गर्भे पिण्डस्य पालनं–पोषणं विदधाति । पितुः वीर्यस्य यत्कणं, रजसि मिलति, तस्य भागदानं मातुः भागदानाधिकं न भवति । वेदः अत एव मातुः मनोऽनुकुलं प्रस्थातुं आज्ञां प्रददाति । मातुः भावनानां समादरणं प्रत्येकस्थितिषु सन्तानेभ्यः अनिवार्यं कर्तव्यं भवेत् । पितुः व्रतानुकूलं सन्तास्य वृतं स्यात् । अतः यत् पिताः व्रतं गृहीतमस्ति, यच्च कार्यभारं पिता स्वीकृत, तद्वतं, कार्यभारञ्च पूर्णतां प्रापयितुं कार्य पुत्रस्य भवति । अनेन परम्परायाः निर्माणन्तु भवत्येव, तत्संस्कृतेः आचारप्रणाल्याश्चापि संवर्धनं भविष्यति, तच्च राष्ट्रजातीयानां मेरूदण्डस्य कार्यं कुरुते । जातीयानां समक्षं तस्य स्वर्णातीतं भूत्वा प्रेरणां प्रदास्यति, भविष्यस्य च कृते सुपथस्य सङ्केतं प्रयच्छति । अस्य हेतुरस्ति यत् परम्परायाः श्रृङखलाः अनवरतं वर्धमानाः स्युः । एवं सत्यपि परिवारस्य निर्माणं केन प्रकारेण जायते तदपि चिन्तितमस्ति । यथा –

परिवारस्य निर्माणं पतिपत्न्योः सामञ्जस्ये न जायते । द्वावपि विभिन्नपरिवारात् देशाच्च समागत्य वैवाहिकविधिद्वारा दाम्पत्यसूत्रे बद्ध्वा एकस्य नूतनस्य परिवारस्य निर्माणं करुतः । सम्बन्धोऽस्मिन् द्वावपि परस्परमुभयोरपि संरक्षकौ स्तः । यद्यपि द्वयोरपि वृत्तिषु आकारे च स्वभावतः

अन्तरं विद्यते । एकस्मिन् कर्कशता अपरस्मिन् च मार्दवम् । एकः सामाजिक संघर्षे भागं गृहणाति, अन्यश्च गृहस्य संचालनं निर्वहति । एकः प्रगतिपथमुपरि आरोहति, द्वितीयः स्थितिपरकः वर्तते । परिश्रमं विधाय पुरुषः यदा गृहं प्रत्यावर्तति, गृहञ्च प्रविशति तदा पत्नी सर्वप्रथमं स्वस्य शान्तिप्रदायिनी; पियूषमयी – वाणीद्वारा तस्य मनसः उपरि स्वस्थं हितकरञ्च प्रभावमुत्पादयति, यतो हि पत्युः अधिकाशशरीरश्रान्तारा दूरं भवति ।

गृहस्थाश्रमे सन्तुलनमत्यावश्यकं वर्तते, तस्य निर्वाहः दम्पत्योः हस्तगतं विद्यते । अस्य सन्तुलनार्थं वेदे मधुमतीवाण्याः साधनरूपेण उल्लेखः कृतोऽस्ति । वाणी उपलक्षणात्वेन कथितास्ति । अनया अन्याचरणानि कार्याणि च उपलक्ष्यन्ते । पतिः पत्नी च मूलतः ऋतस्य सत्यस्य च प्रतिरूपमस्ति । उभयोः मिथुनीभावः अथवा युग सन्नद्धता गृहस्थस्य एकाङ्गीभावोऽस्ति । अस्मिन् एकत्वे आर्यसंस्कृतेः विशिष्टलक्ष्यं सन्निहितं विद्यते ।

परिवारे मधुरफलरूपाणि बालकान्यपि भवन्ति । तानि भ्राता, भगिनी अभिधानेन विज्ञायन्ते । प्रायः विलोक्यते यत् भ्राता, भगिनी च एकीभूय, क्रीडन्ति, तत्र भगिनी स्वकीया पृथक् क्रीडांस्थलीं विरचयति । वेदः कथयति यथा

मा भ्राता भ्रातरं द्विषन् स्वसारमुत स्वता

(अथर्ववेद....)

अर्थात् परिवारे निवासं कृत्वा कस्यापि द्वेषं न कुर्यात् । सर्वेऽपि विना द्वेषं प्रेमपूर्वकं गृहे निवासं कुर्युः । संयुक्तपरिवारे भ्राता मात्रा सहनिवासं विधाय, सम्मिल्ल्य च निवसति कश्चिद् कालानन्तरं परिवारः सञ्जायते । व्यतीते

समयेऽपि परिवार: पृथक् न भवति । मातापित्रो: जीवितावधिं यावत् सहैवनिवसन्ति । अपवाद: भवति, अस्त्यपि । तथापि संयुक्तपरिवारस्य पृथक् विशेषता: उत्तरदायित्वञ्च विद्यते ।

इयमवस्था भगिनीनां न भवति । ताभिस्तु माता, पिता, परिवारादीन् विवशीभूय परित्यज्यन्ते, तया च स्वकीयं पृथक् परिवार: विरच्यते । अत: सा यावत् परिवारेऽस्मिन् भवति, तावत् मातापितृबन्धुमसेषां स्नेह: प्राप्नुयात् ।

आर्यपरिवारयोजनायां पुत्र्या: पृथक परिवार निर्माणेन सा स्नेहवञ्चिता न विहिता । तस्या: यथाकश्चित् भाग: प्रथमपरिवारेण सह सम्बद्धित: भवत्येव, स च तेन जीवनपर्यन्तमुपलभ्यते । अस्मदीये विधिविधाने दौहित्रोऽपि मातामहस्य सम्पत्ते: अधिकारी अमनित: विद्यते, स च मातामहस्य श्राद्धमपि विदधाति ।

इत्थं भ्राता भगिन्या: सम्बन्ध: क्षणिकं नास्तिक, अपितु दीर्धकालं यावत् चलति, द्वयोश्च पारस्परिकप्रेम्णा आबद्धोऽस्ति । परिवारे सर्वैरेतै: सम्मिल्ल्य वास्तव्य: । एतत् तदैव शक्यमस्ति, यदा समेषां व्रतं समानं स्यात्, या च वाणी उच्चरिता स्यात्, सा भ्रदा, कल्याणी च भवेत् । वाण्येव सर्व व्यवहारसाधिकास्ति । अत: तस्य: प्रयोगे सावधनपूर्वकं वर्तितव्यं समै: ।

परिवार: समस्तसमाजस्य आधारशिला विद्यते । या कौटुम्बिकता परिवारनिष्ठा वा एकस्मिन् गृहे दृश्यते, सा यदि समाजे समग्रे विलोकयत्त्तर्हि, विश्वकल्याणस्य समय: नास्ति दूरे । अस्मोभि: वर्गसंघर्षस्य न, अपितु वर्गमैत्र्या: शंखनाद: विहित: । पारस्परिकं द्वेषं नापितु, अन्योन्यं प्रति प्रेम्ण: सन्देश: सम्प्रदत्त: । वेदै: अपि अभिधीयते "समाना हृदयानि व: सं वो मनांसि जानताम्"

अर्थात् सर्वेषां हृदयस्थभावाः समानाः, मानसिकविचाराश्च समानाः स्युः कोऽपि कस्यापि द्वेष मा कार्षीः । यथा गौः सद्योजात वत्सं व्यवहरति, तद्वत् वयं परस्परं सम्मिल्य व्यवहारं कुर्याम । वेदस्य पावनतमः सन्देशः सकलजीवानां कृते वर्तते ।

या स्थितिः परिवारस्य वर्तते, सैव समाजस्य विद्यते । वैदिकसंस्कृतिः यस्य आधारेण प्रचलति, सा जगतः व्यापकव्यवस्थायाः शाश्वतनियमाना मुपरि अवलम्बितास्ति । या कुटुम्बवादस्य कृते अपक्ष्यते, सैव समग्रविश्वस्य एक्तायाः कृते आवश्यकमस्ति । पारिवारिकधर्म एव समाजः एवं विश्वरूपिणं बृहत्परिवारं सञ्जालयितुं उपयुक्तः विद्यते । यथा

ज्यायस्वन्तश्चित्तिनो मा वियौष्ट
संराधयन्तः सधुराश्वरन्तः ।
अन्यो अन्यस्मै वल्गु वदन्त एव
सध्रीचीनान्वः संमनसस्कृणोमि ॥[१] ऋग्वेद

समानीप्रपा सहवोऽन्नभागः
समाने योक्त्रे सह वो युनज्मि ।
सम्यञ्चोऽग्निं सपर्यतारा
नामिमिवाभिरतः ॥[२] ऋग्वेद

सध्रीचीनान्वः संमनसंस्कृणोमि
एक श्रुष्टीन्त्संवननेन सर्वान् ।
देव इवामृतं रक्षमाणाः सायं
प्रातः सौमनसो वो अस्तु ॥[३] ऋग्वेद

१ ऋग्वेद
२ ऋग्वेद
३ ऋग्वेद

प्रभोश्च मानवानां कृते आदेशोऽस्तियत् त्वं क्षुदतायाः पृथक् भूत्वा महान् भूयाः । महतां पुरूषाणां सम्मानं कुरु । तैत्तिरीय उपनिषदि अपि धर्म सिद्धान्तोऽयं यथा वर्णितो विद्यते ।

यदि ते कर्मविचिकित्सा वावृत्त–
विचिकित्सा वा स्यात् ये तत्र ब्राह्मणः ।
सम्मर्शिनोयुक्ता अलुक्षा धर्मकामाः स्यु :
यथाते तत्र वर्तेरन, तथा तत्र वर्तेथाः ॥ तै.उ.

इत्थं धर्मतत्वप्रधानं मानवानां पारिवारिकं जीवनं साफल्यदायकं, समृद्धिकारकं भवेदिति पारिवारस्य सौहार्दस्य सन्निहितं लक्ष्यं निरुपयितुं शक्यते ।

## २.२ विश्वबन्धुत्वस्य भावना

विश्वबन्धुत्वस्य भावः एव विश्वोन्नतेः मार्गं प्रशस्तं करिष्यति । अस्मदीया संस्कृतिः विश्वसंस्कृतेः समर्थनकर्त्री विद्यते । अत एव पद्यमिदं, सुभाषितमिदं वो पलभ्यते ।

अयं निजः परो वेति ।
गणनालघुचेतसाम् ।[१]
उदारचरितानां तु ।
वसुधैव कुटुम्बकम् ॥ पञ्चतन्त्रम्

अर्थात् लधुचेतसां हीनमनोवृत्तिमतां जनानां स्वकीयः परकीयः इत्यनुरूपा गणना, सङ्कीर्ण विचारधारा भवति, किन्तु अस्माद‍ृशाः आर्यसद‍ृशाः भारतवर्षीयास्तु

१ पञ्चतन्त्रम्

सदैव विश्वः एकः परिवारोऽस्ति' इति महती, औदार्यपरिपूर्णया भावनया जीवनमुन्नतं कुर्वन्ति । तेषामेक्ता दर्शकविचाराः यथा अथर्ववेद प्राप्यन्ते ।

विराड् वा इदमग्र आसीत्, तस्याः जातायाः सर्वमविभेदयमेवेदं भविष्यतीति । सोदक्रामत् सा गार्हपत्ये न्यक्रामत् । सोदक्रामत् साहवनीये न्यक्रामत् । सोदक्रामत् सा दक्षिणाग्नौ न्यक्रामत् । यन्त्यस्य सभां सभ्यो भवति य एवं वेद । सोदक्रामत् सा समितौ न्यक्रामत् । यन्त्यस्य समितिं सामित्यो भवति य एवंवेद । सोदक्रामत् सा मन्त्रणे[1] न्यक्रमत् । यन्त्यस्या मन्त्रमान्त्रणीयो भवति य एवं वेद ।"

अर्थर्ववेदस्य सूक्तेऽस्मिन् मानवसमाजस्य एवं संस्थानां क्रमिकविकासस्य सुन्दरं सुस्पष्टं च वर्णनं विद्यते । प्रथमं विराट् अराजका दशा अभवत् । स्थितेरस्मात् उद्गम्य गार्हपत्यदशा समागता । पूर्वं परिवारस्तु आसीदेव । ततः आहवनीय दशा समागता । ततः कुल्लानां मुख्यजनत्वेन दक्षिणाग्निः । ततः समग्रं राष्ट्रं यावत् संगठनं सञ्जातम् । इत्थं वेदे विश्वस्य एकतायाः बन्धुत्वभावनायाः वा विचारः प्राप्यते ।

वैदिक साहित्यस्य अध्ययनेन एव अस्माकं जीवनस्य सार्थकत्वं विद्यते । वेदानां अध्ययनेन तस्य वैज्ञानिकत्वं अपि सिद्धं स्पष्टं च भवति । वर्णव्यवस्थायां वैज्ञानिकपक्षेषु पुरुषार्थचतुष्टये यज्ञ विज्ञाने च भारतीय सांस्कृतिकस्तम्भेषु वैदिकसाहित्यस्य एव प्रभावः अस्ति । एतस्मात् अतिरिक्तं भारतीयसंस्कृतिमध्ये एतस्याः अनुयायिनः ये सन्ति तेषामुपरि अपि वैदिकसाहित्यस्य प्रभावः वर्तते । प्राकृतिकसम्पत्तयः अपि धार्मिकानुष्ठाने आधारभूता च अतः नदीनां पर्वतानां, वृक्षाणां प्रति पुण्य भाववत् व्यवहारः

---

१ अथर्व.–८/१०/१

क्रियते । सर्वासु प्रकृतिषु देवभावः दृश्यते । देवदृष्ट्या सर्वत्र दृष्ट्व्यं इत्यपि ऋषिमुनेः भावः दार्शनिकत्वं तथा च भगवद्गीतादृष्ट्या पण्डितलक्षणम् यथा –

विद्या विनयसम्पन्ने ।
ब्राह्मणे गवि हस्तिनि ।
शुनि चैव श्वपाले च
पण्डिता समदर्शिनः ॥[१] भ.गी.५/१८

अनेन कारणेन पशुषु पक्षिषुः सर्वप्राणिषु अस्माकं दृष्टिः करूणामया भवति आदरपूर्णा च भवति । तत्र सर्वत्र वैदिकसाहित्यस्य प्रभावः एव । वैदिकसाहित्यस्य प्रभावेण पठनेन च विश्वकल्याणस्य भावाः सहजाश्च प्रवृत्तयः भवन्ति अत एवैषा विश्ववारा संस्कृतिः । विश्बन्धुत्वभावः विश्वशान्तेरुपायाः अनेन वैदिकसाहित्ये न समुपलब्धाः भवति । समग्रभूम्याः भूमौ निवासिनां कृते अपि समानरूपेण कल्याणस्य भावनां व्यनक्ति । अनेन प्रमाणेन पुरूषार्थी जनं प्रति एश्वर्यं स्वतः आकृष्टं भवति । अथर्ववेदस्य तत्र प्रमाणं यत् 'चोदचेन्द्र राये रमस्वतः ।'' वैदिक साहित्यस्य अध्ययनारम्भः अध्ययनकर्तुः स्वास्थ्यचरित्रेन्द्रिय निग्रहैः सह अनुशासनेन च साकं भवति । प्रारम्भिकावस्थायामेव जनः मानवः वा देवो रूपो भवति मानवतापूर्णहृदयेन सह नैतिकतायाः विकासो भवति । एषा यात्रा अग्रसारिता भवति तेन च मानवः पूर्णमानवः भवति । वैदिकसाहित्यपठनेन सन्तोषः, धैर्यम्, त्यागः, इन्द्रियनिग्रहः, तपस्यायाश्चसञ्चारो भवति । यत् तपः वा तपसः प्रभाव अग्रे गत्वा कामक्रोधादिदुर्गुणैः मानवं विमुखी करोति । जन प्रभावकः बुद्धिमान् च भवति । वेदानां सम्यक् उपासनया अध्ययनेन मानवः विचारं करोति यत्, अहं अग्रे गत्वा पथभ्रष्टो न भवेयम् ।

१ भ.गी.५/१८

वेदाध्ययनकर्तुः विचाराः भवन्ति यत्, समाजः सुखयुक्त, शान्तिमयः भवेत्, तदर्थं तस्य यत्नाः भवन्ति । वृतोपवासैः यस्य अन्नस्य धनस्य वस्तुनः संग्रहो वा भवन्ति । चेत् तेन स अन्यस्य अपेक्षां तोषयति । वैदिकसाहित्यस्य स्थाना समाजः राष्ट्रं च समस्यारहितं भवति वा भविष्यति काले वैदिकमार्गः एव विश्वशान्त्यै योगदानं दास्यति , कारणं वैदिकसाहित्यमतेन सम्पूर्णमानवजातिः एवं समग्रं विश्वं एकः परिवारः अस्ति । अत एव "यत्र भवति विश्वैकनीडम्" ।

इत्थमत्र विश्वपरिवारभावः, समाजसंगठनं, राष्ट्रीय एकता, वेदगतः विश्वशात्यै सन्देशः, इत्यादि उदारविचारैः लोककल्याणस्य सर्वोत्तमा कल्पना विश्वबधुत्वभावनायाः विचारैः निरूपिता दृश्यते ।

## ४.३ वेदेषु राष्ट्रीय भावना

मानव सभ्यता–संस्कृत्योश्च आधारग्रन्थः वेदरूपो विराजते । अनेन ज्ञानमयेन शास्त्रेण भूतभव्य वर्तमानानां सम्यक् सूक्ष्मतमं ज्ञानं सूलभमस्ति । तस्मादेवोक्तम् – "भूतं भव्यं भविष्यं च सर्वं वेदे प्रतिष्ठितम्" आदि सृष्टिकर्तुः मनोरयं सिद्धान्तो वर्तते यदस्य सर्वस्यापि जगतः प्रपञ्च विधात्रा वेदमाधारीकृत्य । सर्वेषां जीवानां संस्थानां ज्ञान–विज्ञानानां च मूलं स्रोतः वेद एवं वर्तते ।

सर्वेषां सतु नामानि ।
कर्माणि च पृथक्–पृथक् ।
वेद शब्देभ्य एवादौ
पृथक् संस्थाश्व निर्ममे ॥[१]

स्वयं भगवान् वेदोऽपि सिद्धान्तमिमं परिपोषयति । यदा परमात्मा एकाकी आसीत् तदा तस्य मनो न रोचते स्म । "सोऽऐच्छत् तपस्तप्यत एकोऽहं

१. मनु स्मृ.–१–२१

बहु स्याम प्रजायेय" इति । इत्युपनिषद् वाक्यमुपदिशति यन्मानवः एकाकी कथमपि सानन्दो न भवति न च जीवितुं प्रभवति । ऋग्वेदेऽथिअवलोक्यते

"ऋतं च सत्यं चाभीद्धातपसोध्य-जायत [१]

ततो राच्यजायत ततः समुद्रो अर्णवः ।

समुद्रादर्णवादधि संवत्सरो अजायत्

अहोरात्राणि विदधद् विश्वस्यमिषतो वशी ।

सूर्यो चन्द्रमसौ धाता यथापूर्वमकल्पयत् ॥ इति

ऋ.स.१०-१९०-१-३

जीवनाय जनसमूहे निवासः समपेक्षते । सम्पन्ने च जनसमूहे जीवनपद्धतिरपि अपेक्षते । तदर्थं मानवैः कदाचित् सभा, समितिः, साम्राज्यं, अधिराज्यं, राष्ट्रादिकं च समूहानुरुपं नाम चकार अत्रेदं सुविचिन्त्यमस्ति यत् का सभा ? तस्याः का परिभाषा ? का समितिः ? किञ्च राज्यं किमधिराज्यं साम्राज्यं राष्ट्रं वेति सर्वं क्रमशः सुविशदं यथा - सम्भवमगे प्रतिपादयिष्यते । सभा समित्योरपि प्राक्तनकालिकः प्रतीयते । यतः स्वयमेव श्रुतिर्ब्रवीति ।

सभा च मा समितिश्चावताम्[२]

प्रजापतेर्दुहितरौ संविदाने ।

येन संगच्छा उपमाशिक्षा

चारूवदानि पितरः संगतेषु ॥ (अथर्ववेद-७/१२/१)

---

१. ऋ.सं.१०-१९०-१-३

२. अ.स.७/१२/१

"विदम ते सभे नाम ।

मारिष्य नाम वा असि । [१]

ये ते वो च सभादस्ते

मे सन्तु सवाचस: ॥

ये ग्रामा यदरष्यं या:

सभा अधिभूम्याम् । [२]

ये संग्रामा: समिति

स्तेषु चारू वदेम ते ॥

मनुष्य समूहा: यत्र सम्भूय वसन्ति स्म, तस्य लधु भूभागस्य ग्रामेति नाम प्रचलति आसीत् सम्प्रत्यपि प्रवर्तते । तस्य ग्रामस्य यो नेता भवति स्म स ग्रामणी शब्देन व्यवह्यते स्म । यथा सम्प्रति अस्माकं ग्रामे ग्राम्य: मुख्य: "मुखिया" पदेन व्यवहार्यो भवति । ग्राम समूहानां अधिमुख्यो यो भवति स्म स एव क्षेत्राधिपतिपदेन प्रसिद्धो भवति स्म । सम्प्रति एतादृशा: "जमीन्दार" पदेन व्यवह्तो भवति । क्षेत्राधिपतय: सम्भूय गुणविशिष्ट नरं राजसूययज्ञे प्रवर्तमाने सप्तश प्रकारकै: जलै: "वृष्ण ऊर्मिरसीत्यादि" शुक्लयजु: संहितोक्त-मन्त्रै: समन्त्रकं अभिसिंचते स्म । स एव नर: राजापदेन व्यवहार्य: आसीत् ।

तत्वार्थस्तु सारस्वतीभिर्मन्त्रै: सत्पदशै: प्रतिमन्त्रं अमुष्यै इत्यस्मिन् पदे श्रीरामायेत्यादि चतुर्थ्यन्तं नामग्रहणपूर्वकं अभिषेको विधेय: । स्वाहेति मन्त्र-वाक्यै: सप्तदशवारं सहैव आज्यहोमोऽपि कर्तव्य: । इत्यवं प्रकारेण अभिषिक्त सम्राट् स्वकीयं राष्ट्रं समग्रभुवनलक्षणकं सर्वगुण सम्पन्नं

---

१. अ.सं.७-१२-२

२. अ.सं.७-१२-३

सर्वोपद्रवरहितं विद्धति । तस्मादभिषेकस्य सर्वस्मिन्नपि युगे औचित्यमेव । सम्प्रति निरभिषिक्ताः मन्त्रिगणाः शपथग्रहण समारोह समये असत्य शपथग्रहणं कृत्वा राष्ट्रिय प्रजाजनं वञ्चयन्ति । किन्तु प्रत्यवायजन्यं दुष्फलं न लभन्ते, प्रत्युत सप्तपुरूषं यावत् भविष्यत् कालं अर्थ चाकचक्ये चमत्कुर्वन्ति । पुरा अभिषेकसमये अग्निसाक्षित्वे राष्ट्ररक्षा, राष्ट्रोन्नति राष्ट्राभिवृद्धि निमित्तं देवसहायं लब्धवा अशक्यमपि कार्यं सम्राट वशी कुरुते स्म । अत एव नैषा प्रथा राज्यतन्त्रिकतां अभिद्योतयति । अपितु "बहुजन हिताय बहुजन सुखाय " सर्वतन्त्रेभ्य कल्पते स्म ।

यदि राज्ञः वंशे राज्य संचालन समर्थः उत्पद्यते स्म, तदासौ राजा भवति स्म नान्यथा । "राजसु श्रेष्ठोऽहं श्रेष्ठोऽहमिति अहमहमिकया वाजपेयेन यज्ञेन यजते स्म ।

असौ साम्राज्याधितिशब्देन प्रसिद्धौ जातः । साम्राज्याधिपतये त्रीषि चत्वारि वा राज्याधिराजानो वा वशवर्तिनो भवन्ति स्म । शतपथे स्पष्टमेवोक्तम् – "सविता राष्ट्रं राष्ट्रपतिः इत्यनेन शब्दव्यवहारेण तेजो बाहुल्यात् सवितुः स्वरूपता ब्रुते । सम्राट् राजृ दीप्तौ इत्येतस्माद् धातोः सम्यक् राजते दीप्यते प्रकाशते प्रभाववान वा अधिराजो भवति । यद्यपि वेदे राष्ट्रपदं न कस्यचिदेकस्य वस्तुनः बोधकम् । यत्र तत्रैव श्रूयते "राष्ट्रं वा अश्वमेधः" "अन्नं वै राष्ट्रं" 'विशो राष्ट्रं", "वरुणः सम्राट्" "सम्राटपतिः राष्ट्रमन्नं इत्यादिभिः विविधविधैः राष्ट्रपदैः नैकस्य वस्तुनः बोधकता स्पष्टो भवति किन्तु एभिः शब्दनिचयैः पृथिव्यां यावन्ति धनवन्ति वस्तूनि तत्सर्वं एकीभूय राष्ट्रीयं राष्ट्ररूपं वा । एतस्यैव सर्वस्य जगतः राष्ट्रपतिः सवितेति श्रुतिर्बूते ।

राष्ट्रं वा आसन्दीति सौत्रामणिः यज्ञ सम्बन्धे राज्ञः आसन्दी आरोहण समकाले सवितृ प्रातिनिध्येन राजाधिराजः राष्ट्रपति पदेन समलंकृतः सन् समभावेन राष्ट्रं पालयति । तस्मादुक्तम् –

ध्रुवा द्यौ–द्युवा पृथिवी
ध्रुवं विश्वमिदं जगत् ।[१]
ध्रुवासः पर्वताः इमे
ध्रुवो राजा विशामयम् ॥

ध्रुवं ते राजा वरुणो ।
ध्रुवं देवो बृहस्पतिः ध्रुवा ।[२]
इन्द्रश्चाग्निश्च राष्ट्रं
धारयतां ध्रुवम् ॥

एभिः मन्त्रवाक्यैः राष्ट्रपदं ध्रुवस्य नैश्चित्यस्य बोधकं तस्माद् ध्रुवं स्वर्गः ध्रुवा पृथिवी ध्रुव सर्वमिदं जगत् । ध्रुवं च पर्वताः सर्वे ध्रुवो राजा नराधिपः इत्यादिभिः ध्रुवपदविशेषणैः एते देवगणाः अस्य राज्ञः राष्ट्रपतित्वे साफल्यातिशयं प्रयच्छन्तु इत्याभिषा विद्वांसः समाजयन्तो ब्रुवते । अत्रेदं राष्ट्रपदं अनेकैः राजभिः सहयोगभावैः संबर्द्धमानाः संसेव माना वा हमे राजानो जायन्ताम् । ततो राष्ट्रं विर्द्धते ।

"सवर्णदिशः सम्मनसः सध्रीचि ध्रुवायते । समितिः कल्पतामिह" इत्येषा श्रुतिः राष्ट्रस्य सर्वदा सर्वथा अभ्युदयमीहमाना संवर्द्धनाय श्रुयते ।

---

१. अ.सं.४/५

२. अं.सं.१०/१७३/४/५

अग्निहोत्र यज्ञप्रकरणे – अष्टाकपाल एकादश कपाल द्वादश कपालै – कपालेषुकस्य संस्था पनमुचितमिति प्रपंचयन् श्रुतिब्रुते – अयमेक कपालो मोहयिष्यति । राष्ट्रमिति, अत्र राष्ट्रपदं समस्त राष्ट्रिय – वस्तुसर्वेषां पशूनां देशहितकारिणां अन्येषां च समस्तानां जीवानां वाचकत्वेन व्यवहुतम् । अधिकस्याधिकं फलमिति समष्टिरूपे राष्ट्रे द्वादश कपालोपाधानस्य औचित्यमिति राष्ट्रस्य प्रशंसायाम् – तात्पर्यं विद्वभः वेदितव्यम् । अनन्तरं राजाराजसूयराज्यमधिराजै साम्राज्यादीनां च चर्चा राजसूय वाजेपयादि प्रकरणे शतपथब्राह्मणादि ग्रन्थेषु विशिष्टरूपेण विद्यते । राज्यं अधिराज्यं साम्राज्यादि शब्दाः राष्ट्रशब्दात् लघुतराः । तस्माद् राष्ट्रे एते सर्वेऽपि शब्दाः "सामुद्रोहि तरङ्ग" इत्यादि शांकर वाक्यवत् राष्ट्राङ्गानि । चयन प्रकरणे यत्र तत्र राष्ट्र समृद्धि बीजं विलोक्ते । परमर्षिः ताण्ड्यो ब्रूते "यजुष्यपत्य लोकं प्रणा इत्यायः इष्टकाः अन्नसमृद्धिकराः भवन्ति । अन्न समृद्धया च राष्ट्रमेतत् समृद्धयते ।

चयनाङ्गतया राजसूर्यचर्चाप्रसंगे "राजा वै राजसूयेनेष्ट्वा भवति सम्राट वाजपेयेन राज्यमुवा अग्रेज्थ साम्राज्ये तस्माद् वाजपेयेन इष्ट्वा राजसूययज्ञेन ।" प्रत्यवरोहः स यथा सम्राट सन् राजास्यादिति इत्यत्र राजसूदयागेनानुष्ठितेन राजा भवति । वाजपेयानुष्ठानेन च सम्राट भवति अर्थात् अन्नाधिक्येन राजैव प्रजा–पालान–पोषण–क्षमः सन् सम्राट् भवति । तस्मात् सत्यमेवोक्त "अन्नाद् राष्ट्रं स्मृतमिति" अस्माकं देशे विवाह समये वधूवरौ । राष्ट्रभृत् होमं कुरूतः तत्कर्मचयनयागस्तथैव वर्तते । राष्ट्रभृत शब्दपर्यालोचनं कुर्वता श्रीमता आचार्यसायणेनोक्तं "राष्ट्रभृदाख्यान् होमान् कुर्यात् । राष्ट्रभरण साधारणेन एतेषां राष्ट्रभृतां राजत्वमाह राजानो वा इति ।"

राष्ट्रभृत होमस्य गृहयसूत्रेषु विशिष्य विचारो विलोक्यते । सान्नाय्यागप्रकरणे सान्माय्यमेव राष्ट्रमनुते श्रुतिः । राष्ट्र सान्नायमिति ।'' यतः सर्वाव्यिपि अन्नानि राष्ट्रोपकारकाणि भवन्ति, अत एव चयन - प्रकरणे अन्न निष्पत्तये सोमो राज्यं, मित्रः क्षत्रं, इन्द्रो बलां, सविता राष्ट्रं, बृहस्यति- ब्रह्मवर्चसं पूषा भगं, सरस्वती पुष्टि, त्वष्टा रूपाणीति । सोमांशुभिः अन्नं सुपुष्टमुत्पद्यते, वरूणेन जलदेवतया अन्नस्य पोषणं भवति, मित्रः सूर्यः अन्नं पक्वं भवति करोति ततो अन्ने यत् पोषणतत्वं समुत्पद्यते तदिन्द्रः बलप्रदः तेन भुक्तेनान्नेन ब्रह्मवर्चसमुत्पद्यते तस्माद बृहस्पति अन्तस्य तेजसो दावा सविता राष्ट्रं यतः सवितृ प्रसूता एवजन्तवः आत्मकल्याणबुद्धया स्वकर्म कुरूते । तेन राष्ट्रं समृध्यति । तस्मात् सविता राष्ट्रमित्युक्तम् । अत एव शतयथब्राह्मणे बहुत्र वरूण सम्राट् सम्राड्पतिः सविता राष्ट्रं राष्ट्रपतिः श्री विराट् मित्रं राष्ट्रमस्य भवति पुनर्मृत्युञ्जयति इत्यादिभिर्वचनैः राष्ट्रमभिगायति । तस्मादस्माकं मिथिला भूमौ अयमेव मन्त्रः ब्राह्मणवशिष्ठन्यायेन जनानामाशीर्वाद प्रदानाय च वैदिकैः कर्ममर्मज्ञैः निश्चितः । तथाहि -

आबह्मन् ब्राह्मणो ब्रह्मवर्चसी जायताम्[१]

राष्ट्रेराजन्यः शूर इषव्योऽति व्याधीमहारथो जायताम् । दोग्ध्री धेनुर्वोढानड्वानाशु सप्तिः पुरन्ध्रिर्योषा जिष्णु रथेष्ठाः समेयो युवास्य यजमानस्य वीरो जायताम् । निकामे निकामेनः पर्जन्यो वर्षतुफलवत्यो न ओषधयः पच्चन्तां योगक्षेमो नः कल्पताम् ॥

तथा च शतपथश्रुतौ राष्ट्रं वाश्वमेधः । राष्ट्र एते व्यायच्छन्ते येऽश्च रक्षन्ति तेषां य उद्वचं गच्छन्ति राष्ट्रेणैव ते राष्ट्रं भवन्ति । अथ ये नोदृचं गच्छन्ति राष्ट्रान्ते व्यवछिद्यन्ते योराष्ट्रायाश्वमेधेन यजेत ।

१. च.सं.२२/२२

आब्रह्मन् ब्राह्मणो ब्रह्मवर्चसी जायतामिति । ब्राह्मण एव ब्रह्मवर्चसं दधाति । तस्मात् पुरा ब्राह्मणो ब्रह्मवर्चसी यज्ञे । आ राष्ट्रे राजन्य: । शूर इषव्योऽपि व्याधो महारथो जायतामिति । राजन्य एव शौर्य महिमानं दधाति । तस्मात पुरा, राजन्य: शूर इषव्योऽपि व्याधी महारथो जज्ञे ।दोग्ध्री धेनुरिति धेन्वामेवपयोदधाति तस्मात् पुरा धेनुदोग्ध्री जज्ञे । वोढानड्वानिति । अनडुह्येव बलं दधाति । तस्मात् पुरानड्वान वोढा जज्ञे । पुरनिध्रर्योषेति योषित्यव रूपं दधाति । तस्माद्रुपवती युवति प्रिया भायुका । जिष्णु रथेषु । इति । राजन्य एव जैत्र महिमानं दधाति तस्मात् पुरा राजन्यो जिष्णुर्जज्ञे । सभेयो दुवेति । एष वै सभेयो युवा । य: प्रथम वयसि तस्मात् प्रथमवयसो स्त्रीणां प्रियो भावुका: ।

अस्य यजमानस्य वीरो जायतामिति । यजमान प्रजायां वीर्यं दधाति । तस्मात् पुरेजानस्य वीरो जज्ञे । निकामे निकामे न: पर्जन्यो वर्षत्विति । निकामे निकामेवै तत्र पर्जन्यो वर्षति । यत्रैतेन यज्ञेन यजन्ते फलवत्यो न ओषधय: पच्यन्तामिति फलवत्यो वै तत्रोषधाय पच्यन्ते। यत्रैतेन यज्ञेन याजन्नेतस्माद् यत्रैतेन यज्ञेन यजन्ते क्लूप्त: प्रजानां योगक्षेमो भवति । वाहनोरेवबलं धत्ते ।

राष्ट्रसम्बन्धे सविस्तरं वेदानुरूपं विवेचनं बहुभि: प्रकारै: प्रस्तुतम् । वैदिक सन्दर्भसमता संस्कृतवाङ्मयस्य भवेन्नेवेति विचार्य प्रकरणमिदं अतीव गहनम् अतीव विस्तृतं स्यात् तस्मात् संक्षिप्त विधाय राष्ट्र स्वरूपं निरूपणं मितं च सारं च वचो हि वाग्मिता' । इति प्रमाणवचनमनुसृत्य क्रियते ।

वेदेषु राष्ट्रस्वरूपं यथा व्यापकं समृद्धतमं च वर्तते न तथा स्मृतौ राष्ट्रस्वरूपं विलोक्यते । स्मृतौ राष्ट्रपदं राज्ञ: स्वारक्षित भूभागस्यैव लघुतरस्य वाचकमिव प्रतीयते । तस्मिन् समये निश्चितरूपेण क्षत्रिया एव राजकार्येषु

शासकपदं समलंकुर्वन्ति स्म । ब्राह्मण: साचिव्येन यद्यपि राज्ञोऽपि नितान्तं समादरणीयत्वं पदं अलंचक्रु: तथापि राज्ञ: शानसनमनुसृत्यैव तेऽपि समृद्धा बभुवु: । स्मृतिकालीनं राष्ट्रं सर्वथा उपद्रुतं दुर्भिक्षादिपीडितं आसीदित्यनुमीयते । अतो राजभि: कीदृशं देशं राष्ट्ररूपं उरीकर्तव्यमिति प्रतिपादितम् मनुना –

जाङ्गलं शस्यसमपन्नं ।

आर्यप्रायमनाविलम् ।[१]

रम्यमानञ्च सामन्तं

स्वानीव्यं देशमाविशेत् ॥

तथा याज्ञवल्क्यस्मृतावपि प्राप्यते ।[२]

रम्यं पशव्यमाजीव्यं ।

जाङ्गलं देशभावसेत् ।

तत्र दुर्गाणि कुर्वति ।

जातकोशात्म गुप्तये ॥

अनेन प्रमाणवचनेन वैज्ञानिकाविष्काराशभावशात् उर्वरागुणोपेतं रम्यं प्राकृतिकं गुणोपेतं भूमिमेव राजभि: आश्रयणीयम् इति निर्दिष्टम् । सम्प्रति वैज्ञानिकेऽस्मिन् युगे अनुर्वरा पर्वताक्रान्ता जयप्रयापि भूमि: यङ्किला समादरणीया वर्तते । यत: एतादृक् स्थलेष्वेव खनिजद्रव्याणि नानाविधानि समुपलभ्यमानानि विलोक्यन्ते ।

---

१ मनुस्मृति

२. या.स्मृ.

राजा स्वराष्ट्रसेवानिरतः न्यायपरायणः दण्डप्रदाने च सर्वथा शत्रुमित्रयोः भेदविरहितः सन् नीरक्षीर विवेचिताः एव प्रदर्शयते । रागादिवशादपि धर्मनिर्णये धर्मोपेक्षां न कुर्यात्। सुहृदवर्गेषु नितान्तं स्निग्धेषु परमादरणीयेषु वृद्धजनेषु ब्राह्मणेषु च क्षमाशीलो भवेत् । यथोक्तं स्मृतौ

स्वराष्ट्रे न्यायवृत्तः स्याद्
भृशदण्श्च शत्रुषु ।[१]
सृहृत्स्वजिह्मामः स्निग्धेषु
ब्राह्मणेषु क्षमान्वितः ॥
ये राष्ट्राधिकृतास्तेषां
चारैर्ज्ञात्वा विचेष्टितम् ।
साधुधू सम्मानयेद्राजा विपरीतांश्च धारयेत् ॥

अत्रैव याज्ञवल्य – स्मृतावपि –

"जारेण जनयेद गर्भ मृतेऽव्यक्ते गते पतै ।[२]
तां त्यजेदपरे राष्ट्रे पतितां पापकारिणीम् ॥

स्वराष्ट्राभिरक्षपरैः राजा सेनापतौ हस्त्यश्वरथपपदातीनां सतर्कतया निश्चितो भवेत् । तदिच्छयैव तेषां सर्वेषां उननत्यवनत्यादि कार्य कुर्यात् । दण्डयान् दण्डयेत्, आज्ञापरान् पारितोषिकैः परितोषयेत् । तथा च शुल्कग्रहणं नियमेन षष्ठांशं अनार्तेभ्यो गृहणीयात् । युद्धात् पूर्वं कोश–निश्चयः तथा सन्धिविग्रहादिनिर्णयः सचिवसहयोगेन विभिन्नप्रतिष्ठितैः नागरिकैश्च परामृश्य राष्ट्रस्याभिरक्षणे राजा सर्वदैव दत्तचितः सन् प्रजाहितसाधनपरो भवेत् ।

---

१. कामन्दकीय नीतिसारे –
२. याज्ञवल्क्य स्मृ.

एतादृशानां राज्ञां प्रशंसाभिमुखाः सभ्याः राष्ट्रियाः राज्ञां प्रति मनुक्ताभिमां धारणां दृढं संरक्षति ।

ईशो दण्डस्य वरुणो
राज्ञां दण्डधरो हि सः ।
ईशः सर्वस्य जगतो
ब्राह्मणो वेदपारगः ॥

उपर्युक्तानेन वचनेन धार्मिको राजा राष्ट्रकल्याणकामनया सनातन-धर्मतरोर्मूलस्य वेदरूपस्य संरक्षणपरो भवेत् । वेदरक्षकानां राष्ट्रे सर्वोत्कृष्टं सम्मानं आवश्यकमिति स्वयमेव भगवान मनुः अस्मानुपदिशति । राष्ट्रे व्यापारिणः, चौराः, तस्कराः, धूर्ताः, शठाश्च यदि राजशासनं उपेक्षेयुः तदा ते राजा कठोरदण्डैः यथायुक्तं तान् दण्डयेत् । अन्यथा राष्ट्रं उपद्रुतं भवति । राजा च राजपदात् भ्रष्टः सन् नरकंव्रजति । यस्य राज्ञः राष्ट्रे प्रजावर्गाः निर्भयाः निवसन्ति । तस्य राज्ञः यावविन्ध्यहिमाचलौ तिष्ठतः तावज्जयघोषं प्रवर्तते । तथा चोक्तं मनुना -

स तាननुपरिक्रोमत् सर्वानेव
सदा स्वयम् ।[१]
तेषां वृत्तं परिणयेत्
सम्यम् राष्ट्रेषु तच्चरैः ॥

तेषां चराणां क्रियाकलापाः ज्ञानाय सभा समित्योः साहाय्यं गृहीतव्यम् । विषयेऽस्मिन् मनोः याथातथ्यं वचनमिदं सदैव ध्यातव्यम् । तद्यथा -

१. मनु.-७/१२२

शरीरकर्षणात् प्राणाः

क्षीयन्ते प्राणिना यथा ।

तथा राज्ञामपि प्राणाः

क्षीयन्ते राष्ट्रकर्षणात् ॥[1]

संभासमित्योः प्रतिवेदनानुरूपं दण्डाः पुरस्कारश्च सम्यक् परीक्ष्य प्रदातव्याः । यथोक्त मनुना –

राष्ट्रेषु रक्षाधिकृतान् ।

सामन्तांश्चैव चोदितान्

अभ्यधातेषु मध्यस्तान् ।

शिष्यान् चौरानिव द्रुतम् ॥

स्वाम्यमात्यौ पुरं राष्ट्रं

कोशदण्डौ सुहृधा ।

सप्त प्रकृतयो हयेताः

सप्तांग राज्य उच्यते ॥

राज्यस्य सप्ताङ्गानि धर्मशास्त्र-प्रसिद्धानि श्रुयणमाणानि सन्ति । एतेषु सर्वाप्यपि अन्योन्याश्रितानि समृद्ध राष्ट्रानि अतिशयेनावश्यकानि भवन्ति । यथा अस्माकं शरीरे किमपि अङ्गव्रणयुक्तं रुग्णं वा भवति तदा वयं सर्वेभ्योऽप्यङ्गेभ्योऽव्याकुलताधिक्यकारणात् शौथिल्य मनुभवामः । देवाधिपति / इन्द्रोऽपि तं सदाचार सम्पन्नान् धार्मिकानि, राष्ट्रपतीन् वृष्टिद्वारा शस्यसंपन्नं कन्दमूलफलादिभिः धृतादिभिश्च परिपूर्वं इषमूर्ज च यच्छतः अतएवोक्तं मनुना –

१. मनु.-७/११२

वार्षिकांश्चतुरोमासान्

यथेन्द्रऽभिप्रवर्षति ।[1]

तथाभिवर्षेत स्वं राष्ट्रं

कामैरिन्द्र व्रतं चरन् ॥

एतेरूपायैरन्यैश्च

युक्तो नित्यमतन्द्रियः ।[2]

स्तेनान् राजा निगृहणीयात्

स्वराष्ट्रे पर एव च ॥

राज्ञः एतत् परं कर्तव्यमस्ति यत् असौ उदीयमानमादित्यमिव स्वशक्त्या अष्टौ मासान् यावत् विभिन्नप्रकारान् करान् (शुल्कान्) यथायोग्यं प्रजावर्गात् सामदामदण्डभेदानाश्रित्य गृहणीयात् । एवं प्रकारेण शुल्कग्रहणेन तैः शुल्कैः राष्ट्रस्य सर्वतोऽभिमुखं समुन्नतिं कुर्यात् । अस्मिन् प्रसंगे कालिदासस्योक्तिः समुचितं प्रतिभाति । तद्यथा-

"दुदोह गां स यज्ञाय

शस्याय मधवादिवमम् ॥"(रघुवंश)[3]

तथा च धर्मशास्त्रे

अष्टौ मासान् यथादित्य

स्तोयं वहति रश्मिभिः ।

तथा हरेत् करं राष्ट्रा

न्नित्यमर्कवृत हि तत् ॥

---

१. मनु.-९/३०८

२. मनु.-९/३१२

३. मनु.-७/१२८

यथा फलेन युज्येत

राजा कर्ता च कर्मणाम् ।

तथा वेदयन्नृपो राष्ट्रे

कल्पयेत् सततं करान् ॥ (म.स्मृ.७/१२८)

गुणदोष-विवेकं विना हठात् दण्डप्रयोगेन राजा दुर्गं राष्ट्रं समस्तां च पृथिवीं त्रासयति । यस्मिन् राष्ट्रे अदण्डया: दण्डयन्ते, तस्मिन् राष्ट्रे अधिभूत अधिदेव प्राकृतिकाश्व उपद्रवा: स्वयमेव स्वामिनं ग्रासयति ।

महाभारतकाले राष्ट्रं सुसमृद्धं प्रजावर्गाश्च सर्वथा सुखिन: चतुराश्रमसेविन: आसन् । एतस्मिन् विषये प्रजापालनरायण: कश्चिन्नृप: राक्षसान् तर्जयन् सगर्वं ब्रुते - "अरे । रे राक्षस: अस्माकं राष्ट्रे कस्यापि वस्तुन: अभावोनास्ति तस्माच्चौराणामभाव: सर्ववस्तु सद्भावेन उदारा: चत्वारो वर्णा: विराजन्ते । तथोक्तं व्यासेन -

न मे राष्ट्रे विधवा ब्रह्मबन्धु -

र्न च ब्राह्मण: कितवोनीतचौर: ।

अयाज्ययाजी न च पापकर्मा

न मे भयं विद्यते राक्षसेभ्य: ॥

इत्थमत्र सर्वव्यापक राष्ट्रियभावनाद्वारा राज्ञ: प्रजापालनं, राष्ट्ररक्षणं, न्यायव्यवस्था, उचिता करव्यवस्था, पराक्रमशालिनता, यजन-याजनतत्रता (राजसूयादिद्वारा) इत्यादिविषयै: लोककल्याणस्य सङ्कल्पना निरूपिता विद्यते ।

## ४.४ वैदिकी शिक्षा-प्रणाली द्वारा लोककल्याणस्य निर्देशः ।

शिक्षापदं विद्यामूलकं, उच्चन्ते जनैः । 'द्वेविद्येवेदितव्ये परा चैवाऽपरा''१ - चेत्युक्तिः विद्याभेदं संसूचयति । अतोऽस्मिन्नेव सन्दर्भे परमात्मनः द्विविधं स्वरुपं ज्ञेयं भवति । यथा -

विद्याञ्चाविद्याञ्च
यस्तद्वेदोभयं सह ।
अविद्यया मृत्यं तीर्त्वा ।
विद्ययाऽमृतमश्नुते ॥[२] य.स.४०/१४

इत्यत्र उवणृमहीधराचार्यौ व्याख्यातौ । यथा - अविद्यापदेशकर्मधर्मयोर्ज्ञानं यज्ञादिकर्मरूपं भवति । तैरमृतत्वस्य भागी भूत्वा पराभिर्ब्रह्माविद्याभिज्ञानफलरूपाभिः नरः ब्रह्मरूपं लभते । अत उभयरूपज्ञान-साध्यसाधनरूपेण सिद्धो भवति ।

शिक्षापदेन वर्णस्वराद्युच्चारणप्रकारो यत्र उपदिश्यते सा शिक्षेति सायणाचार्यस्य विचारः । तथा हि तैत्तिरीयोपनिषदारम्भे समामनन्ति ।

शिक्षा व्याख्यास्यामः । वर्णः, स्वरः, मात्रा, बलं, साम, सन्तान इत्युक्तः शिक्षाध्यायः ''इति । किन्तु क्रमशः शिक्षाशब्दः समग्रज्ञान-विज्ञाना-दिर्व्यवस्थावाचकः सम्प्रत्यस्ति । अतस्तादृशी एवास्माभिरपि शिक्षा-शब्दोऽभिहितः ।

### ४.४.१ निरूक्ते शिक्षणविचाराः

शिक्षासन्दर्भे वेदानां महत्त्वपूर्णं स्थानमस्ति । ऋग्वेदे विद्याब्रह्मणसंवादे

---

१. मुण्डकोपनिषदि-१/१/४/६
२. य.स.४०/१४

गुरुशिष्यसम्बन्धे अतीव स्वाभाविकी चर्चा विलोक्यते । ऋङ्मुखेनैव सांख्यायिका वर्तते यस्य संक्षेपतश्चर्चा चर्च्यते । यथा च –

विद्या हवै ब्राह्मणमाजगाज [१]
गोपाय मा शैवधिष्टेऽस्मि ।
असूयकायानृजवे यथाय न मा
बूया: वीर्यवतो तथा स्याम् ॥

एतदेवाभिप्रायं मनुरपि वदति । तथा हि –

विद्या ब्राह्मणमत्याह [२]
शेवधिष्टेऽस्मि रक्ष माम् ।
असूपकाय मां मादा
स्तथा स्यां वीर्यवत्तमा ॥ म.स्मृ.२/१/१४

अर्थात् विद्याष्ठात्री देवी ब्राह्मणेभ्यो वदति – ते तव अहं शेवधिनिधिरस्मि मां रक्ष । केभ्य इति प्रश्ने असूयकाय दानात् ये निन्दका: सन्ति तेभ्यो दानात्मां रक्षेति । एवं रक्षि-ताऽहं तव तवोचितामभिलाषां पूरयिष्यमि इत्यभि प्राय: ।

य आतृ षत्त्यवितथेन कथा –
वदुखं कर्पन्न्मृतं सम्प्रयच्छन् ।
तं मन्येत पितरं मातरञ्च
तस्मै न द्रुहये कतमच्च्नाह ॥
मनुरपि अवदत् । यथा –

---

१. नरूक्त.२/४
२. म.स्मृ.२/१/१४

उत्पादक ब्रह्मदात्रो

गरीयान् ब्रह्मदः पिता ।

ब्रह्मजन्म हि पिप्रष्य

प्रेत्य चेह च शाश्वतम् ॥[1] म.स्मृ.२/१४६

पूवस्मिन् मन्त्रे आचार्यस्य नियमानुक्त्वा अस्मिन् मन्त्रे छात्रस्य नियमान् ब्रूते । अवितथं अनृतं अपुरुषार्थभूतं लौकिकं वाक्यम् । ताद्विपरीतं सत्यं वेदवाक्यमवितथम् । तादृशेन वाक्येन च आचार्य छात्रस्य कर्णौ आतृणत्ति कणौ पूरयति । यः सर्वदा वेदं श्रावयति । किं कुर्वन् ? अदुःखं कुर्वन् । मन्दस्य ब्रह्मचारिणः "पच्छोर्धचैशः" आदौ अर्धर्चमृचं वा गृहीतुमशक्तस्य यथा कष्टं न भवति तथा पादैकदेशं वा ग्राह्यन् । किञ्च अमृतं देवजन्मनो मोक्षस्य वा प्रापकत्वाद् अमृतं वेदार्थः, तस्योपदेशं कुर्वन् । तं तादृशमाचार्यं शिष्यो मुख्यतयामातृपितृरूपं मन्येत् । एवंविधस्य मनुष्यजन्मनः देवत्वप्रापकस्य कदाचिदपि द्रोहं नैव कुर्यात् ।

अध्यापिता ये गुरूं नाद्रियन्ते विप्रा वाचामनसा कर्मणा वा ।[2]

यथैव ते न गुरोर्भोजनीयास्तथैव तान्न भुनक्ति श्रुतं तत् ॥ निरुक्त-२/४

ये त्वधमा विप्रा गुरूणा अध्यापिताः सन्तोऽविनियावत्या तदीयाहितचिन्तनेन शुश्रुषया वा गुरुं नाद्रियन्त आदररहितास्ते शिष्याभासा निन्द्याश्छात्राः गुरोर्न भोजनीया अनुभवयोग्या न सम्पद्यन्ते, न तेषु गुरुः कृपां करोति । यथैव गुरूणा ते न पालनीयस्तथैव तानधमान् शिष्यान् तच्छस्त्रं तु गुरुपदिष्टं वेदवाक्यं न पालयति, न फलदं भवति । तस्मान्मनुना कथितं यथा

---

१. म.स्मृ.-२/१४६

२. निरूक्त - २/४

खनकः कश्चित् खनित्रेण लघुना कदाचित्पातालतलं भित्वा जलमधगच्छति तथैव गुरूशुश्रुषापरः शिष्यः गुरुगता विद्या तस्मै गुरूसेवकाय प्रतिगच्छति । तथा हि –

यथा खनन् खनित्रेण [1]
नरो वार्यधिगच्छति ।
तथा गुरुगता विद्या
शुश्रुषुमधिगच्छति ॥ म.स्मृ.२/११८

गुरुशिष्यसंवादे चरमोऽयं मन्त्रः [2]

यमेव विद्याः शुचिमप्रमत्तं
मेधाविनं ब्रह्मचर्यापपन्नम् ।
यस्ते न दुहयेत् कतमच्चनाह
तस्मै मा भूया निधिपायाऽप्रमादिने ॥

मनुरपि एतदभिप्रायमेव सरलया भाषया ब्रूते । यथा –

यमेव तु शुचिं विद्यात् नियतं ब्रह्मचारिणम् ।[3]
तस्मै मां ब्रुहि विप्राय निधिपायाऽप्रमादिने ॥

एवम्प्रकारेण गुरुगतां विद्यामधिगत्य विविधशास्त्रपारावारप्रवीणाः शिष्याः वेदं सहस्रशाखं चक्रुः । एवंविद्या एव शिष्या ज्ञानाधिकारिणो भवन्ति स्म, ये शुचित्वादिगुणैः सम्पन्नाः लोभद्रोहादिशून्याः ब्रह्मचर्यनियम-

१. म.स्मृ.२/११८
२. निरुक्त-२/४
३. म.स्मृ.-२/११६

परिपालनबद्धपरिकरा: गुरूशुश्रुषारता गुरोराश्रमे निवसन्त: गुरुपदिष्टमुपदेशं च पालयन्त: सदैव निरलसा भवन्ति स्म । तादृशानेव छात्रानभिलक्ष्य वेदमन्त्रो ब्रुते । तथा हि –

उतत्व: पश्यन्न ददर्श वाच –[१]
मुतत्व: श्रृण्वन्न श्रृणोत्येनाम् ।
उतो वस्मै तन्वं विसस्रे
जायेव पत्य उशती सुवासा: ॥
ऋ.सं.१०/७१/४

अनया ऋचा मुर्खं प्रति ज्ञानरूपा वाक् स्वात्मानं गोपयति । अत: स अज्ञानेनावृत: सर्वगुणसम्पन्नां वाचं पश्यन् अपि न पश्यति, श्रृण्वन्नपि तद्‌गुणानुभव-शून्य: न श्रृणोति । किन्तु ये शिष्या गुरुपदेशान् निभालयन्त: वेदानधिजगृहस्तान् प्रति यथा जाया प्रत्ये कामयमाना सुवासा: स्वात्मानं विवृणुते एवं वाग्‌विदे स्वमात्मानं प्रकाशयति सर्वं ज्ञानरहस्यं तत्समक्षं शिष्येभ्य: विद्या वशम्बदेव जायते । ते नियमनिर्वाहपरिपालनपटव एव बटव: ज्ञानं प्रकाशयन्ति । तानेवाभिलक्षीकृत्य इयमृग् ब्रुते । यथा –

सक्तुमिव तितउता युनन्तो[२]
यत्र धीरामनसा वाचमक्रत ।
अत्रा सखाय: संख्यानि जानते
भद्रैषां लक्ष्मीर्निहताधिवापि ॥
ऋ.सं.१०/७१/२

---

१. ऋ.सं.१०/७१/४
२. ऋ.स.१०/७१/२

यथा काचिद् गृहिणी सक्तून् पावित्रीकर्तु चालन्या चालयति सक्तूँश्च पावयति तथा गुरुसेवया मनोयोगेनाधीता विद्यायेभ्यः भवन्ति ते पदपदार्थवाक्यविशारदाः धीराः प्रज्ञानवन्तो मनसाध्यानेन वाचमकृत वाचामक्रषत । अत्रा सखायः सख्यानि सखिभाव मैत्री जानते विजानाति विद्या । एषां वाचि षडङ्गज्ञानां मुखे वन्दनीया स्तुत्या लक्ष्मीः निहिता तिष्ठति । इत्येवैषा प्राचीनकाले शिक्षा–परम्परा सुसमृद्धा आसीदिति गृह्यसूत्र – स्मृतिग्रन्थेषु विस्तरेण द्रष्टुं शक्या वर्तते ।

उपनयनान्तरं समावर्तन यावद् गुर्वाश्रमे उषित्वा ब्रह्मचारिणः विविधान् नियमान् पालयन्तः सश्रम चतुर्षु आश्रमेषु वहनक्षमतां लब्ध्वा गुरोराश्रमात् प्रतिनिवर्तन्ते स्म । तत्र चत्वारो वेदाः साङ्गाः सशीर्षाः समधीत्य समावर्तन्ते स्म ।

वेदार्थज्ञाः पुरूषाः द्विविद्याः भवन्ति । एके चतुर्दशविद्याज्ञानकुशलाः सर्वविद्यासम्पन्नज्ञानकुशला व्यासादयः । अपरे आधुनिकविद्योदधि–विन्दुमात्राधिगता गर्वभराश्च । सम्प्रति एवं विद्या एव विद्वांसः सुलभाः सन्ति किन्तु वेदाभ्यासांशिका अपि अधुना दुर्लभायमानाः विलोक्यन्ते इत्यहो कालस्य करालेयं विडम्बनेति । अत्र मन्त्रमुखेन वेदार्थज्ञानकुशलवैदिकस्य प्रशंसां पुनरुद्धरामः । यथा –

उत त्वं सख्ये स्थिरपीतमाहु [१]
नैनं हिन्वत्यापि वाजिनेषु ।
अधेन्वा चरति माययेवा वाचं
शुश्रुवाँ अफलामपुष्पाम् ॥ इति ।

---

१. ऋ.सं.१०/७१/५

अस्य व्याख्यानं सायणाचार्यैणेत्थं कृतम् । पूर्वोदाहृतायाः 'उत त्वः पश्यन्' इत्यादिकाया ऋचोऽनन्तरमेवाम्नाता या ऋक् तस्य पूवोक्तमन्त्रार्थस्य भूयसे निर्वचनाय सम्पद्यते । तदित्थम् अतिरायेन प्रतिपादयितुं प्रभवति । कथमिति चेत् ? तदुच्यते । अपि च एकं चतुर्दशविद्यास्थानकुशलपुरूषं वेदरूपाया वाचः सख्ये स्थित्वा स्थैर्येण वेदोक्तार्थमृतपानयुक्तमाहुः, अर्थाभिज्ञाः कथयन्ति । "सखिविद् सखायम्" इति मन्त्र वेदस्य सखित्वमुदाहुत्तम् । यद् वा स्वर्गलोके वेदानां सख्ये स्थित्वा अतिशयेन पीतामृतमाहुः । वाचामिना ईश्वराः सभासु प्रगल्भा वा वाजिनाः । तेषु मध्येऽपि एन वेदार्थकुशलं चोदयितुं न हिन्वन्ति, न कोऽपि प्राप्नुवन्ति । तेन सह विवदितुमसमर्थत्वात् । यस्तु अन्यः पाठमात्रपरः पुष्पफलरहितां वाचं श्श्रुवान्भवति । यथा लोकं पुष्पं फलस्य उत्पादकं तथा वेदानुवचनादिधर्मज्ञानम् अनुष्ठानेन द्वारा फलात्मकब्रह्मज्ञानेच्छां जनयति ।[१] "तमेतं वेदानुवचनेन ब्राह्मणा विवदिषन्ति यज्ञेन दानेन तपसा नाशकेन" इति श्रुते । यथा च फलं तृप्तिहेतुस्तथा ब्रह्मज्ञानं कृतकृत्यत्वहेतुः, "[२] यतः पूर्णानन्दैकबोधस्तद् ब्रह्माहमस्मीति कृतकृत्यो भवति" इति श्रुतेः । तादृशपुष्पफलरहितवेदपाठका । स एष पुमान् अ धेन्वा मायया सह चरति । नवप्रसूतिकाक्षीरस्य दोग्ध्री गौः प्रीतिहेतुत्वाद् धिनोतीति व्युत्पत्या धेनुरित्युच्यते । पाठमात्रपरं वेदरूपां वाग्धर्मज्ञानरूपं क्षीरं न दोग्धीत्यधेनुः । अत एवासौ माया कपटरूप, ऐन्द्रजालिकनिर्मितगोसदृशरू- पत्वात् । तया मायया सह चरन्नयं परमपुरूषार्थं न लभते इत्यर्थः । अतो वेदाध्ययनस्य सार्थकत्वमर्थज्ञानं पूर्वकस्योत्कृष्टत्वमित्यतः सार्थज्ञानपुरःसरं वेदानामध्ययनमावश्यकत्वेनोपदिष्टमिति ।

---

१. बृहदारण्यकोपनिषद्-४/४/२२
२. परमहंसोपनिषद्-५

त्रिप्रकाराश्छात्रा गुरुकुले वसन्ति स्म ।'[१] एके विद्या स्नातका: द्वितीय: वृतस्नातकास्तृतीय: विद्याव्रतस्नातकाश्च" इति । अर्थात् वेदं समाप्य सार्थ-पाठपूर्वकं मन्त्रब्राह्मणभाग्गात्मकं समाप्य असमाप्य गुर्वाश्रमवासकालां समाप्य य समावर्तते स विधा स्नातको भवति स्म । य: व्रतं ब्रह्मचर्यं द्वादशवार्षिकं समाप्य सम्पूर्णं वेदमधीत्य च समावर्तते स वृतस्नातक: । एवं च वृतस्नातकस्य विवाहोत्तरकालं अध्ययनसमापनं वेदार्थज्ञानं च मन्तव्यम् । तथा यो ब्रह्मचारी नियते द्वादशवर्षे सार्थवेदमधीत्य समावर्तते स विद्यावृतस्नातक इत्यमीधयते स्म । इत्थं गृहयसूत्रसमकाले एषा व्यवस्थाऽध्ययनगतस्य उदारा सञ्जाता । उपर्युक्तमतमेव पोषयता याज्ञवल्क्येनोक्तम् । यथा -

[२]"वेदं वृतानि वा पारं नीत्वा ह्यु भयमेव वा" । इति वेदशास्त्रज्ञं प्रकृत्य तैत्तिरायारण्यकेऽतीव प्रशंसा श्रूयते । तद्यथा -

यावर्तीवै देवतास्ता सर्वा वेदविदि ब्रह्मणे वसन्ति । तस्माद् ब्राह्मणेभ्यो वेदविद्भ्यो दिवे दिवे नमस्कुर्यान्नाश्लील कीर्तयेदेता एव देवता: प्रीणाति" इति ।

अथर्ववेदसंहितायां तु विस्तरेण शिक्षास्रोतांसि विलोक्यन्ते, तानि संक्षेपतो निरुपयाम: । अस्मिन् मन्त्रे इमे भावा अवगुण्ठिता: सान्ति । उपनयमान आचार्यस्तस्य अन्तेवासिन: अन्त:करणे स्वाधिगतं ज्ञानविज्ञानं सर्वा विद्यामुपदिशति, न किमपि रहस्यं गोपयति तस्मात् । तदा गुरोरिय भावना आसीद्यदयं मदपेक्षयाऽप्यधिक: श्रेष्ठतरो विद्वान भवेत् । अत एव कथ्यते । यथा -

---

१.पारस्कर गृ.सु.२/५/३२

"शिष्यादिच्छेत्पराजयमि " । तिस्रो रात्रीर्बिभर्ति अज्ञानान्धकारनिवृत्तये तं स्वाश्रमे स्थापयति । यतो हि रात्रिशन्दः अधिकारवाचकः । अयमेवार्थः कठोपनिषदि श्रुयते । यथा

"तिस्रो रात्रीर्यदवात्सीगृहे मेऽनश्नन्[१]

ब्रह्मन्नतिर्नमस्यः त्रीन् वरान् वृणीष्येति ।"

अथर्व.स.११/५/१

उपर्युक्तगुणवतश्छात्रान् द्रष्टुं देवा अपि आगच्छन्ति स्म इति । ईदृक् प्रशिक्षितः शिष्यः आचार्याद् गृहीतज्ञानवान् सर्वत्र स्वोत्कृष्टां प्रतिभां प्रदर्शयति स्म । तत्कृते ऐहिकामुष्पिकं ज्ञानं करामलकपत्रिलोको भूत्वा देशे विदेशे च प्रशास्त्यं भजते स्म । मातृपितृवदाचार्योऽपि विद्यादानेन तस्य जननकारणाभ्यां पितृभ्यामपि मान्यतरः । यतोऽसौ अज्ञानात् "सा विद्या या विमुक्तये" इति वचनात् शिष्याणां जन्मदातेति प्रश्नोपनिषदि विलोक्यते । यथा – 'त्वं हि नः पिता योऽस्माकमविद्यायाः परंपारंतारयति" तथाचाहापस्तम्बः' स हि विद्यातस्तं जनयति तच्छ्रेष्ठं जन्म शरीरमेव माता–पितरौ जनयतः' इति ।

आपस्तम्बस्य भावमभिव्यनक्ति महर्षिव्यासोऽपि यथा – हि

आचार्ययोनिमिह ये प्रविश्य

भूत्वा गर्भ ब्रह्मचर्यं चरन्ति

इहैव ते शास्त्रकारा भवन्ति

विहाय देहं परमं यान्ति सत्यम् ॥

शरीरमेतौ कुरूतः पिता माता च भारत ।

आचार्यतस्तु यज्जन्म तत्सत्यं वै तथाऽमृतम् ॥

---

१.अथर्व.स.११/५/१

अस्येदं तात्पर्यं यदाचार्यात् सांसारिकाज्जन्मनः पारे गच्छति । अतस्तस्यैव 'द्विजत्व' मिति उच्चते । एतद्विधानां वाचः त्रिकालसत्याः शापानुग्रहणे क्षमाश्चासन् । एतादृशानां ज्ञानवतामनादरेण देशस्य विनाशो भवति स्म । अत एवोक्तं मनुना

क्षत्रियं चैव सर्पं च ब्राह्मणं च बहुश्रुतम् ।
नावमन्येत वै भूष्णुः कृशानपि कदाचनेति ॥

इत्थमत्र वैदिकविचारधारायां शिक्षाप्रणाली द्वारा या लोककल्याणस्य सङ्कल्पना विहिता निरूपिता वर्तते तदत्र, समस्त-वैदिकवाङ्मयस्य सारभूतविचारान् स्वीकृत्य, सारं गृहीत्वा, निष्कर्षमुपलभ्य विज्ञातुं शक्यते यत्, शिक्षाप्रणालीद्वारा अवश्यमेव लोककल्याणं विधातुं शक्यते, तां शिक्षाप्रणालीं विना लोककल्याणप्रवृत्तिः कथमपि न शक्या इति नितरामुच्यते । एवम्प्रकारेण प्रकरणेऽत्र पारिवारिकं सौहार्दं, विश्वबन्धुत्वस्य भावना, वेदेषु राष्ट्रीयभावना, वैदिकी शिक्षाप्रणाली इत्यादिप्रमुखविचारैः लोककल्याणस्य नीतिरीतिविचाराः समीक्ष्य निरूपिताः वर्तन्ते । इतोऽप्यग्रे राजनीतिः, धर्मनिष्ठता, अर्थनीतिः, सुरक्षाव्यवस्था इत्यादिषु विविधविचारेषु चर्चां कृत्वा लोककल्याणस्य विचारान्, सङ्कल्पनाञ्चाधिगन्तुं शक्नुमः किन्तु अतिविस्तारभयादत्रेव प्रकरणमिदं समाप्नोमि ।